## णेर्विभाषा। (३०/२८३६)

ण्यन्ताद् यो विहितः [1]कृत्प्रत्ययः तत्स्थस्य नकारस्य उपसर्गस्थान्निमित्तात् उत्तरस्य विभाषा णकारादेशो भवति। प्रयापणम्, प्रयापनम्। परियापणम्, परियापनम्। प्रयाप्यमाणम्, प्रयाप्यमानम्[2]। प्रयापणीयम्, प्रयापनीयम्। अप्रयापणिः, अप्रयापनिः। प्रयापिणौ, प्रयापिनौ, विहितविशेषणं किम्? प्रयाप्यमाणम् [3]इत्यत्र यका व्यवधानेऽपि यथा स्यात् इति॥

## हलश्चेजुपधात्। (३१/२८३७)

[4]कृत्यचः इति वर्तते। हलादिः यो धातुरिजुपधः तस्मात् परो यः [5]कृत्प्रत्ययः तत्स्थस्य नकारस्य अच उत्तरस्य उपसर्गस्थान्निमित्तादुत्तरस्य विभाषा णकारादेशो भवति। प्रकोपणम्, प्रकोपनम्। परिकोपणम, परिकोपनम्। हलः इति किम्? [6]प्रेहणम्। प्रोहणम्। इजुपधात् इति किम्? [7]प्रवपणम्। परिवपणम्। कृत्यचः इति नित्ये प्राप्ते विकल्पः। अचः इत्येव, परिभुग्नः। इजुपधस्य सर्वस्य हलन्तत्वादिह हल्ग्रहणमादिविशेषणम्॥

## इजादेः सनुमः। (३२/२८३८)

हलः इति वर्तते, तेन इह सामर्थ्यात् तदन्तविधिः। इजादेः सनुमः हलन्ताद्[8] धातोः विहितो यः [9]कृत्, तत्स्थस्य नकारस्य उपसर्गस्थान् निमित्तात् उत्तरस्य [10]णकारो भवति। प्रेङ्खणम्। [11]परेङ्खणम्। प्रेङ्गणम्। [12]परेङ्गणम्। [13]प्रोम्भणम्। परोम्भणम्। 'सिद्धे सत्यारम्भो नियमार्थः' (का. प. ६२), इजादेरेव सनुमः, नान्यस्मात् इति[14]। [15]प्रमङ्गनम्। परिमङ्गनम्। हलः इत्यधिकाराद् ण्यन्ते नित्यं विध्यर्थमेतन्न भवति॥

## वा निंसनिक्षनिन्दाम्। (३३/२८३९)

[16]उपसर्गात् इति वर्तते। निंस निक्ष निन्द इत्येतेषां नकारस्य उपसर्गस्थान्निमित्तात् उत्तरस्य वा णकारादेशो भवति। प्रणिंसनम्, प्रनिंसनम्। प्रणिक्षणम्, प्रनिक्षणम्। प्रणिन्दनम्, प्रनिन्दनम्[17]। [18]णोपदेशत्वादेतेषां नित्ये प्राप्ते विकल्पः[19]॥

## न भाभूपूकमिगमिप्यायीवेपाम्। (३४/२८४०)

भा भू पू कमि गमि प्यायी वेप इत्येतेषाम् उपसर्गस्थात् निमित्तादुत्तरस्य कृत्स्थस्य नकारस्य णकारादेशो न भवति[20]। भा – प्रभानम्। परिभानम्। भू – प्रभवनम्। परिभवनम्। पू – प्रपवनम्। परिपवनम्। [21]पूग्रहणेन पूञ्ग्रहणं द्रष्टव्यम्। पूङो हि भवत्येव णत्वम्, प्रपवणं सोमस्य इति। कमि – प्रकमनम्। परिकमनम्। गमि – प्रगमनम्। परिगमनम्। प्यायी – प्रप्यायनम्। परिप्यायनम्। वेप – प्रवेपनम्। परिवेपनम्।

[९५२] [22]ण्यन्तानां भादीनामुपसङ्ख्यानं कर्तव्यम्। (म. भा. ३.४६२)
प्रभापनम्। परिभापनम्[23]॥

---

1. प्रत्ययः नास्ति इ. 2. परियाप्यमाणम् परियाप्यमानम् इत्यधिकम् ब. 3. परियाप्यमाणम् इत्यधिकम् क. ह. 4. वाक्यमिदं नास्ति ब. 5. प्रत्ययः नास्ति इ. 6. प्रयाहणम् ब. 7. प्रवाहणम् परिवाहणम् ह. 8. वा इत्यधिकम् क. 9. कृत्प्रत्ययः क. इ. 10. णत्वं क. 11. परीङ्खणम् ड. 12. परीङ्गणम् ड. 13. प्रोंहणम परोंहणम् क 14. तेन इह न भवति इत्यधिकम् क. इ. 15. प्रसङ्गनम् ब. 16. वाक्यमिदं नास्ति ब. 17. परिणिन्दनम परिनिन्दनम् इत्यधिकम् इ. 18. वाक्यमिदं नास्ति ब. ड. 19. उच्यते इत्यधिकम् क. 20. कृत्येन इति प्राप्तः प्रतिषिध्यते इत्यधिकम् क. इ. 21. पूग्रहणे ब, भादिषु पूग्रहणे क. इ. 22. ण्यन्तादीनां च क. 23. प्रभावनम् परिभावनम् इत्यधिकम् इ.